# गुरु गीतम्

१ अव्यक्ताद्यत एतद् व्यक्तं जातमशेषम् |
यद् धत्ते तदजस्रं यत्रान्ते लयमेति ||

२ आधारे खलु यस्मिन् गोलानां सह लक्षैः |
ब्रह्माण्डं प्रतितिष्ठत्येतन्निस्तुलसत्वे ||

३ सूर्यादिग्रहभासां यन्मूलं घनतेजः |
यद् ब्रह्मादिसुराणां शक्त्यै शक्तिरुताहो |

४ ज्ञात्वा तत्त्वमसङ्गा भासा यस्य रमन्ते |
यज्जालेन समस्ते द्वैतेक्षाऽल्पमतीनाम् ||

५ यद्ध्यानेन भवन्ति स्वात्मानन्दनिमग्नाः |
यन्निष्ठा खलु मुक्तिर्यच्छन्दोऽपि तदर्थः ||

६ तद् ब्रह्म प्रणवाख्यं चित्ते ध्यानकृते मे |
अश्रान्तं रमणाख्यां बिभ्रद् भातु मदिष्टाम् ||

७ आधारे धृतमूलं हार्दाब्जे कृतवासम् |
शीर्षाब्जाय वहद्यत् पश्चादिन्द्रियशक्त्यै||

८ दृष्ट्यां तत्र पराच्यां यद्देहभ्रमकारि |
आवृत्तं तु पुनर्यत् स्वात्मैक्यानुभवाय ||

९ पश्यद्वा विषयौघं विश्रान्तं यदुताहो |
मुक्त्यै संस्थितमन्तर्वृत्त्यैक्यानुभवेन ||

१० आत्मज्योतिरिदं मे बिभ्राणं रमणाख्याम् |
अश्रान्तं स्फुरतात् तत् शुद्धं हार्दसरोजे ||

११ यद्दीपाद्रमणाख्याद् व्याप्तं गाणपतीषु |
वाणीभित्तिषु धत्ते गीतचित्रविलासम् ||

१२ यद् हन्तिञ् छविजालै रज्ञानां तिमिराणि |
तत्तत्त्वं स्फुरताद्वः तारधानसमाधौ ||

१३ यातायातविहारै राधारेषु च शीर्षे |
सञ्चारं विदधानं किञ्चाशेषविसारि ||

१४ आलम्बेन विहीनं व्योमामं परिपूर्णम् |
निश्शब्दं गुरुरूपं तद् ब्रह्म स्फुरतान्मे ||

१५ ध्यानं भाति परोक्षं यत्तत्त्व श्रवणेन |
यत्साङ्गत्यविशेषो हेतुः स्यादपरोक्षे ||

१६ यच्चिन्ता स्थिरमुक्त्यै ब्रह्मैतद्रमणाख्यम् |
मामावृत्य समन्तादानन्दे निदधातु ||

१७ तारानन्दनियुक्तः प्रीत्या तस्य मतेन |
आधाद्दीप्तगभीरं वासिष्ठो गुरुगीतम् ||